**एकविंश: पाठ:**

# सूक्तय:

सूक्तय: जीवनमन्त्रा: भवन्ति। सूक्तिषु स्वल्पाक्षरै: गूढं गम्भीरं प्रभूतं च जीवनप्रेरकतत्त्वानि अन्तर्भवन्ति। जना: सूक्तिभि: स्वल्पकालेनैव ज्ञानसम्पन्ना: भवितुमर्हन्ति। अल्पप्रयासेन तत्त्वबोधार्थं सूक्तीनाम् अनुपमं योगदानम् अस्ति। अत: अस्माभि: सूक्तय: विशेषत: पठनीया: स्मरणीया: अनुसरणीयाश्च।

1 पठतो नास्ति मूर्खत्वम्।

2 मितं च सारं च वचो हि वाग्मिता।

3 न सुवर्णे ध्वनिस्तादृग् यादृक्कांस्ये प्रजायते।

4 परसदननिविष्ट: को लघुत्वं न याति।

5 परोपदेशवेलायां शिष्टा: सर्वे भवन्ति वै।

6 माता किल मनुष्याणां देवतानां च दैवतम्।

7 आपदि स्फुरति प्रज्ञा यस्य धीर: स एव हि।

8 पङ्को हि नभसि क्षिप्त: क्षेप्तु: पतति मूर्द्धनि।

9 परोपकार: कर्त्तव्य: प्राणै: कण्ठगतैरपि।

10 न स्वल्पस्य कृते भूरि नाशयेन्मतिमान् नर:।

11 जितक्रोधेन सर्वं हि जगदेतद्विजीयते।

12 सन्त: परार्थं कुर्वाणा नावेक्षन्ते प्रतिक्रियाम्।

13 सहते विपत्सहस्रं मानी नैवापमानलेशमपि।

14 सर्प: क्रूर: खल: क्रूर: सर्पात्क्रूरतर: खल:।

15 स्वधियो निश्चयो नास्ति यस्य स भ्रमति स्वयम्।

## शब्दार्थ:

पठत: - पढ़ने वाले का। वाग्मिता - वाक्पटुता/बोलने की चतुरता। दैवतम् - देवता। स्फुरति - सर्जित होती है। प्रज्ञा - बुद्धि। क्षिप्त: - फेंका गया। भूरि - अधिक। कुर्वाणा: - करते हुए। नावेक्षन्ते - नहीं देखते हैं। स्वधिय: - अपनी बुद्धि का।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) पठतो किं नास्ति ?

(ख) देवतानां दैवतं का ?

(ग) नभसि क्षिप्तः पङ्कः कुत्र पतति ?

(घ) प्राणैः कण्ठगतैरपि किं कर्त्तव्यः ?

(ङ) केन सर्वं जगद्विजीयते ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) कः धीरः ?

(ख) वाग्मिता का ?

(ग) जनाः कदा शिष्टाः भवन्ति ?

(घ) सन्तः किं कुर्वाणाः प्रतिक्रियां न अवेक्षन्ते ?

(ङ) मानी किं सहते ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) कः स्वयं भ्रमति ?

(ख) कः कस्मात् क्रूरतरः ?

(ग) मतिमान् नरः किं करोति ?

4. **प्रदत्तशब्दैः सूक्तिपूर्तिं कुरुत –**

(लघुत्वं, स्वल्पस्य, जितक्रोधेन, स्फुरति, निश्चयो)

(क) न ........................ कृते भूरि नाशयेन्मतिमान् नरः।

(ख) ........................... सर्वं हि जगदेतद्विजीयते।

(ग) परसदननिविष्टः को ........................... न याति।

(घ) स्वधियो .................... नास्ति यस्य स भ्रमति स्वयम्।

(ङ) आपदि ......................... प्रज्ञा यस्य धीरः स एव हि।

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) सुवर्णे | परार्थं कुर्वाणा: |
| (ख) सहते | सर्प: |
| (ग) क्रूर: | कर्त्तव्य: |
| (घ) सन्त: | विपत्सहस्रम् |
| (ङ) परोपकार: | कांस्ये |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –**

(क) धीरपुरुषाणां प्रज्ञा आपदि स्फुरति। ☐

(ख) स्वर्णकांस्ययो: ध्वनि: सममेव भवति। ☐

(ग) खलसर्पयो: मध्ये सर्प: क्रूरतर: अस्ति। ☐

(घ) माता देवतानां दैवतम् नास्ति। ☐

7. **अधोलिखितपदानां समासविग्रहं कृत्वा समासनाम लिखत –**

(क) परोपकार:

(ख) जितक्रोधेन

(ग) कण्ठगतै:

(घ) स्वधिय:

(ङ) परार्थम्

8. **उदाहरणानुसारं पर्यायशब्दान् लिखत –**

यथा – मितम् – स्वल्पम्

(क) सुवर्णे

(ख) देवतानाम्

(ग) प्रज्ञा

(घ) सर्प:

(ङ) सन्त:

9. **विलोमशब्दान् लिखत -**

यथा - खलः - साधुः

(क) धीरः

(ख) सारम्

(ग) शिष्टाः

(घ) स्वल्पस्य

(ङ) क्रूरः

10. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -**

(क) **सर्वे** शिष्टाः भवन्ति।

(ख) **पङ्कः** पतति।

(ग) **सर्पः** क्रूरः भवति।

(घ) **माता** देवतानां दैवतम् भवति।

(ङ) खलः **सर्पात्** क्रूरतरः भवति।

## योग्यताविस्तारः -

- पाठे आगताः सूक्तीः विहाय दशसूक्तीः चित्वा लिखत।
- सूक्तीः कण्ठस्थं कुरुत।

# व्याकरणखण्डः

## सन्धिप्रकरणम्

वर्णयोः वर्णानां वा मेलनं सन्धिः। द्वयोः वर्णयोः बहूनां वर्णानां वा संयोगेन यत् रूपान्तरं जायते सः सन्धिः।

सन्धेः भेदत्रयम् अस्ति - अच् सन्धिः (स्वरसन्धिः) हल् सन्धिः (व्यञ्जनसन्धिः) विसर्गसन्धिः।

## स्वरसन्धिः

स्वरसन्धेः अधोलिखिताः प्रमुखाः भेदाः भवन्ति -

(1) दीर्घसन्धिः (अकः सवर्णे दीर्घः)।

(2) गुणसन्धिः (आद्गुणः)।

(3) वृद्धिसन्धिः (वृद्धिरादैच्)।

(4) यण्सन्धिः (इकोयणचि)।

(5) अयादिसन्धिः (एचोऽयवायावः)।

(6) पूर्वरूपसन्धिः (एङःपदान्तादति)।

**दीर्घसन्धिः -** यदि अ, इ, उ, ऋ स्वराणां मेलनं सवर्णेन 'इत्युक्ते' क्रमशः अ, इ, उ, ऋ इत्येतैः सह भवति तदा वर्णद्वयस्य स्थाने दीर्घस्वरः भवति।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| अ | + | आ | = | आ | → | पुस्तक | + | आलयः | = | पुस्तकालयः |
| आ | + | अ | = | आ | → | विद्या | + | अभ्यासः | = | विद्याभ्यासः |
| इ | + | ई | = | ई | → | गिरि | + | ईशः | = | गिरीशः |
| उ | + | उ | = | ऊ | → | भानु | + | उदयः | = | भानूदयः |
| ऊ | + | उ | = | ऊ | → | वधू | + | उत्सवः | = | वधूत्सवः |
| ऋ | + | ऋ | = | ॠ | → | पितृ | + | ऋणम् | = | पितॄणम् |

**गुणसन्धिः -** यदि 'अ' 'आ' इत्यस्य संयोगः इ, उ, ऋ, लृ इत्येतैः सह भवति तदा क्रमशः द्वयोरेव स्थाने क्रमेण ए, ओ, अर्, अल् इति भवन्ति।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| अ | + | इ | = | ए | → | नर | + | इन्द्रः | = | नरेन्द्रः |
| आ | + | ई | = | ए | → | रमा | + | ईशः | = | रमेशः |
| अ | + | उ | = | ओ | → | पर | + | उपकारः | = | परोपकारः |
| अ | + | ऊ | = | ओ | → | शीत | + | ऊष्णम् | = | शीतोष्णम् |
| अ | + | ऋ | = | अर् | → | राज | + | ऋषिः | = | राजर्षिः |
| अ | + | लृ | = | अल् | → | तव | + | लृकारः | = | तवल्कारः |

**वृद्धिसन्धिः -** यदि अ/आ इत्यस्य पश्चात् ए ऐ अथवा ओ, औ आगच्छति तदा द्वयोः क्रमशः ऐ अथवा औ भवति।

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| अ | + | ऐ | = | ऐ | → | अत्र | + | एकः | = | अत्रैकः |
| आ | + | ए | = | ऐ | → | सदा | + | एव | = | सदैव |
| अ | + | ओ | = | औ | → | राम | + | औदार्यम् | = | रामौदार्यम् |
| आ | + | औ | = | औ | → | महा | + | औषधिः | = | महौषधिः |

**यण्सन्धिः -** यदा ह्रस्वः अथवा दीर्घः इ, उ, ऋ, लृ इति स्वरपश्चात् कोऽपि असमानः स्वरः आगच्छति तदा इ, उ, ऋ, लृ इत्येतेषां स्थाने क्रमशः य् व् र् ल् इति भवति असमान स्वरे तु किमपि परिवर्तनं न भवति।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| इ | + | अ | = | य | → | इति | + | अलम् | = | इत्यलम् |
| इ | + | आ | = | या | → | अति | + | आचारः | = | अत्याचारः |
| उ | + | अ | = | व | → | सु | + | अस्ति | = | स्वस्ति |
| ऋ | + | अ | = | र | → | मातृ | + | अनुमतिः | = | मात्रनुमतिः |
| लृ | + | आ | = | ला | → | लृ | + | आकृतिः | = | लाकृतिः |

**अयादिसन्धिः -** यदि ए, ऐ, ओ, औ इत्येतेषां पश्चात् कोऽपि असमानस्वरः आगच्छति, तदा एतेषां स्थाने क्रमशः अय्, आय्, अव्, आव् इति भवति। असमानस्वरे तु किमपि परिवर्तनं न भवति।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| ए | + | अ | = | अय | → | ने | + | अनम् | = | नयनम् |
| | | | | | | शे | + | अनम् | = | शयनम् |
| ऐ | + | अ | = | आय | → | गै | + | अकः | = | गायकः |
| | | | | | | नै | + | अकः | = | नायकः |
| ओ | + | अ | = | अव | → | पो | + | अनः | = | पवनः |
| | | | | | | भो | + | अनम् | = | भवनम् |
| औ | + | अ | = | आव | → | पौ | + | अकः | = | पावकः |
| | | | | | | पौ | + | अनः | = | पावनः |

**पूर्वरूपसन्धिः -**(पदान्तात् एङोऽति परे पूर्वरूपम् एकादेशः स्यात्) यदि पदस्य अन्ते विद्यमानः एङ् (ए, ओ) अनन्तरम् अत् (ह्रस्व अ) विद्यमानः स्यात् तदा ह्रस्व 'अ' स्थाने 'ऽ' (अवग्रह) स्यात्।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| ए | + | अ | = | अव | → | हरे | + | अव | = | हरेऽव |
| ओ | + | अ | = | अव | → | विष्णो | + | अव | = | विष्णोऽव |

## व्यञ्जनसन्धिः

यः वर्णः स्वरसाहाय्येन उच्चार्यते सः व्यञ्जनवर्णः। स्वरं विना व्यञ्जनोच्चारणं दुष्करं भवति। द्वयोः व्यञ्जनवर्णयोः तथा व्यञ्जनस्वरयोर्मध्ये यः सन्धिः भवति सः व्यञ्जनसन्धिः। व्यञ्जनसन्धेरपि अनेके भेदाः सन्ति। तत्र प्रमुखाः -

**परसवर्णः -** यदि 'त्' वर्णस्य पश्चात् 'ल्' वर्णस्य प्रयोगः भवति तदा 'त्' वर्गस्य स्थाने 'ल्' वर्णः भवति।

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| त् | + | ल् | = | ल् | → | उत् | + | लासः | = | उल्लासः |
| | | | | | | तत् | + | लीनः | = | तल्लीनः |
| | | | | | | तत् | + | लयः | = | तल्लयः |

**छत्व-शश्छोऽटि -** यदि पदान्तझय् अर्थात् वर्गाणां प्रथम-द्वितीय-तृतीय-चतुर्थवर्णस्य पश्चात् श् स्यात् तदा श् स्थाने छ् भवति।

यदि श् परे अट् प्रत्याहारस्य वर्णः अर्थात् - अ इ उ ऋ लृ ए ओ ऐ और ह् य् व् र् स्यात् तर्हि पूर्ववर्ती द् स्थाने 'स्तोः श्चुना श्चुः' इत्यनेन सूत्रेण 'ज्' भवति 'ज्' स्थाने 'खरि च' इत्यनेन सूत्रेण 'च्' भवति। यदि पूर्ववर्ती वर्णः 'त्' स्यात् तर्हि 'स्तोः श्चुना श्चुः' इत्यनेन सूत्रेण 'त्' स्थाने 'च्' भवति।

| | | | | |
|---|---|---|---|---|
| तद् (तत्) | + | शिवः | = | तच्छिवः |
| सत् | + | शीलः | = | सच्छीलः |
| तद् (तत्) | + | शिला | = | तच्छिला |

**तुक्-आगमः -** यदि पदान्त 'न्' वर्णानन्तरं 'श्' स्यात् तर्हि द्वयोः वर्णयोः मध्ये 'त्' वर्णस्य आगमः भवति।

सन् + शम्भुः = सञ्च्छम्भुः (स्तोः श्चुना श्चुः सूत्रेण त् कारस्थाने च् कार)

**अनुस्वारः (मोऽनुस्वारः) -** शब्दस्य अन्तिम मकरात् कोऽपि व्यञ्जनवर्णः स्यात् तदा 'म्' वर्णः अनुस्वारः (÷) भवति, किन्तु अन्ते स्वरः अस्ति तदा एषः नियमः न युक्तः भवति।

यथा -

| | | | | |
|---|---|---|---|---|
| सत्यम् | + | वद | = | सत्यं वद |
| हरिम् | + | वन्दे | = | हरिं वन्दे |
| धर्मम् | + | चर | = | धर्मं चर |
| कार्यम् | + | कुरु | = | कार्यं कुरु |

**जश्त्वम् -** झलां जशोऽन्ते (पदान्ते झलां जशः स्युः) पदान्त 'झल्' अर्थात् वर्गाणां प्रथम-द्वितीय-चतुर्थ-ऊष्मवर्णानां स्थाने जश् - ज् ब् ग् ड् द् स्यात्।

| | | | | |
|---|---|---|---|---|
| वाक् | + | ईश: | = | वागीश: |
| अच् | + | अन्त: | = | अजन्त: |
| जगत् | + | ईश: | = | जगदीश: |
| चित् | + | आनन्द: | = | चिदानन्द: |
| षट् | + | एव | = | षडेव |
| सुप् | + | अन्त: | = | सुबन्त: |

**प्रथमवर्णानां पञ्चमवर्णे परिवर्तनम् –** यरोऽनुनासिकेऽनुनासिको वा। (प्रत्यये भाषायां नित्यम्) 'यर्' प्रत्याहारस्य वर्ण: यदि पदान्ते स्यात् तत्पश्चात् यदि अनुनासिकवर्ण: (वर्गाणां पञ्चम: वर्ण:) भवति तदा 'यर्' स्थाने पञ्चमवर्ण: भवति –

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| दिक् | + | नाग: | = | दिङ्नाग: | → | तत् | + | मात्रम् | = | तन्मात्रम् |
| तत् | + | न | = | तन्न | → | षट् | + | मुख: | = | षण्मुख: |
| | | | | | | वाक् | + | मयम् | = | वाङ्मयम् |

## विसर्गसन्धि:

विसर्गेण सह स्वरस्य अथवा व्यञ्जनस्य मेलनेन य: विकार: भवति स: विसर्गसन्धि: इति कथ्यते। यथा –

| | | | | |
|---|---|---|---|---|
| मन: | + | हर: | = | मनोहर: |
| मन: | + | रथ: | = | मनोरथ: |

**(अ)** विसर्गात् पश्चात् 'च्' अथवा 'छ्' स्यात् तदा विसर्गस्य 'श' भवति। यथा –

| | | | | |
|---|---|---|---|---|
| बाल: | + | चलति | = | बालश्चलति |
| भानु: | + | चलति | = | भानुश्चलति |

**(आ)** विसर्गात् पश्चात् 'त' अथवा 'थ' स्यात् तदा विसर्गस्य स्थाने 'स' भवति। यथा –

| | | | | |
|---|---|---|---|---|
| नम: | + | ते | = | नमस्ते |
| नि: | + | तार: | = | निस्तार: |
| यश: | + | तनोति | = | यशस्तनोति |
| दु: | + | थल: | = | दुस्थल: |

**(इ)** यदि विसर्गात् पूर्वम् अथवा अनन्तरम् 'अ' स्यात् तदा अकार विसर्गयो: स्थाने 'ओ' भवति तथा अनन्तरं य: अकार: तस्य पूर्वरूपं (ऽ) भवति। यथा –

| | | | | |
|---|---|---|---|---|
| स: | + | अपि | = | सोऽपि |
| स: | + | अस्ति | = | सोऽस्ति |

**(ई)** यदि विसर्गात् पूर्वम् 'अ' स्यात् तथा अनन्तरम् 'अ' वर्णं त्यक्त्वा अन्य: कोऽपि स्वरवर्ण: स्यात् तदा विसर्गस्य लोप: भवति। यथा -

| | | | | |
|---|---|---|---|---|
| सूर्य: | + | उदेति | = | सूर्य उदेति |
| राम: | + | आगच्छति | = | राम आगच्छति |

**(उ)** यदि विसर्गात् पूर्वम् 'अ' अनन्तरं 'च' कोऽपि मृदुव्यञ्जनवर्ण: (अर्थात् वर्गाणां तृतीय:, चतुर्थ:, पञ्चम: वर्ण:) भवति तदा पूर्व-अकारविसर्गयो: स्थाने 'ओ' भवति। यथा -

| | | | | |
|---|---|---|---|---|
| पुर: | + | हित: | = | पुरोहित: |
| वय: | + | वृद्ध | = | वयोवृद्ध: |

**(ऊ)** यदि विसर्गात् पूर्वम् आ अनन्तरं कोऽपि स्वर: अथवा कोऽपि मृदुव्यञ्जनवर्ण: (अर्थात् वर्गाणां तृतीय:, चतुर्थ:, पञ्चम: य्, व्, र्, ल्, ह् वर्ण:) भवति, तदा विसर्गस्य लोप: भवति। यथा -

| | | | | |
|---|---|---|---|---|
| नरा: | + | हसन्ति | = | नरा हसन्ति |
| देवा: | + | यान्ति | = | देवा यान्ति |

**(ऋ)** विसर्गात् पूर्वम् 'अ'/'आ' वर्णं त्यक्त्वा कोऽपि अन्य: स्वर: भवति तथा विसर्गात् अनन्तरं कोऽपि स्वर: अथवा मृदुव्यञ्जनवर्ण: (अर्थात् वर्गाणां तृतीय:, चतुर्थ:, पञ्चम: वर्ण: तथा य्, र्, ल्, व्, ह्) भवति तथा विसर्गस्य स्थाने 'र्' भवति। यदि पश्चात् स्वर: भवति तदा 'र्' स्वरेण सह मिलति तथा पश्चात् व्यञ्जनवर्ण: भवति तदा 'र्' वर्णस्य (रेफ:) भवति। यथा -

| | | | | |
|---|---|---|---|---|
| दु: | + | आत्मा | = | दुरात्मा |
| गुरो: | + | आदेश: | = | गुरोरादेश: |
| वधू: | + | एषा | = | वधूरेषा |
| भानु: | + | उदेति | = | भानुरुदेति |
| नि: निर् | + | धन: | = | निर्धन: |
| नि: निर् | + | मक्षिकम् | = | निर्मक्षिकम् |

# समासः

**समासः -** 'समसनं समासः'। समसनम् इत्युक्ते संक्षेपीकरणम्। द्वयोः पदयोः बहूनां पदानां वा मेलनं समासः। समासमध्ये पदानां विभक्तीनां लोपः भवति। यथा -

राज्ञः पुरुषः - राजन् + ङस् + पुरुष + सु = राजपुरुषः




## समासभेदविवेचनम्

1. **तत्पुरुषसमासः -** (प्रायेण-उत्तरपदार्थप्रधानस्तत्पुरुषः) यत्रपूर्वपदं द्वितीया विभक्तितः सप्तमीविभक्तिपर्यन्तम् भवति तथा च उत्तरपदं प्रथमाविभक्तौ भवति तत्र तत्पुरुषसमासः।

| विभक्तिः | समासः | समास-विग्रहः |
|---|---|---|
| द्वितीया तत्पुरुषः | ग्रामगतः | ग्रामं गतः |
| | कृष्णाश्रितः | कृष्णम् आश्रितः |
| तृतीया तत्पुरुषः | बाणहतः | बाणेन हतः |
| | अग्निदग्धः | अग्निना दग्धः |
| चतुर्थी तत्पुरुषः | दीनदानम् | दीनाय दानम् |
| | भूतबलिः | भूतेभ्यः बलिः |
| पञ्चमी तत्पुरुषः | रोगमुक्तः | रोगात् मुक्तः |
| | चौरभयम् | चौरात् भयम् |
| | वृक्षपतितः | वृक्षात् पतितः |

| | | |
|---|---|---|
| षष्ठी तत्पुरुषः | ईश्वरभक्तः<br>विद्यालयः<br>परोपकारः | ईश्वरस्य भक्तः<br>विद्यायाः आलयः<br>परेषाम् उपकारः |
| सप्तमी तत्पुरुषः | जलमग्नः<br>सभापण्डितः<br>कार्यनिपुणः | जले मग्नः<br>सभायां पण्डितः<br>कार्ये निपुणः |
| नञ्तत्पुरुषः | असत्यम्<br>अद्वितीयः<br>अनुपस्थितः<br>अनादरः | न सत्यम्<br>न द्वितीयः<br>न उपस्थितः<br>न आदरः |

2. **द्विगुसमासः –** (सङ्ख्यापूर्वो द्विगुः) यत्र प्रथमपदं सङ्ख्यावाचि भवति तथा च उत्तरपदस्य विशेषतां ज्ञापयति सः द्विगुसमासः भवति। द्विगुसमासे समूहवाचकः अर्थः भवति।

| **सामासिकपदम्** | **समासविग्रहः** |
|---|---|
| पञ्चपात्रम् | पञ्चानां पात्राणां समाहारः |
| पञ्चवटी | पञ्चानां वटानां समाहारः |
| त्रिभुवनम् | त्रयाणां भुवनानां समाहारः |

3. **कर्मधारयसमासः –** (स चासौ कर्मधारयः) यत्र प्रथमं पदं विशेषणम् उपमानं वा तथा द्वितीयं पदं विशेष्यम् उपमेयं वा भवति तत्र कर्मधारयसमासः भवति। यथा -

| **सामासिकपदम्** | **समासविग्रहः** |
|---|---|
| नीलोत्पलम् | नीलम् उत्पलम् |
| घनश्यामः | घन इव श्यामः |
| महापुरुषः | महान् चासौ पुरुषः |
| कृष्णसर्पः | कृष्णः च असौ सर्पः |

4. **द्वन्द्वसमास: -** (प्रायेणोभयपदार्थप्रधानो द्वन्द्वः) अर्थात् यत्र समेषां पदानां प्राधान्यं भवति तत्र द्वन्द्वसमास:।

| **सामासिकपदम्** | **समासविग्रह:** |
|---|---|
| रामलक्ष्मणौ | रामश्च लक्ष्मणश्च |
| हरिहरौ | हरिश्च हरश्च |
| पितरौ | माता च पिता च |
| हेमन्तशिशिरवसन्ता: | हेमन्तश्च शिशिरश्च वसन्तश्च |

5. **बहुव्रीहिसमास: -** (प्रायेण-अन्यपदार्थप्रधानो बहुव्रीहि:) यत्र सामासिकपदेभ्य: अन्यस्य बोध: भवति स: बहुव्रीहि:। बहुब्रीहिसमासस्य अन्ते यस्य स: अथवा येन इति शब्द: भवति।

| **सामासिकपदम्** | **समासविग्रह:** |
|---|---|
| पीताम्बर: | पीतम् अम्बरं यस्य स: (विष्णु:) |
| चन्द्रशेखर: | चन्द्र: शेखरे यस्य स: (शिव:) |
| दशानन: | दश आननानि यस्य स: (रावण:) |
| लम्बोदर: | लम्बम् उदरं यस्य स: (गणपति:) |

6. **अव्ययीभावसमास: -** (प्रायेण-पूर्वपदार्थप्रधानोऽव्ययीभाव:) यत्र प्रथमपदं प्रधानं भवति तथा च प्रथमपदम् अव्ययं भवति, द्वितीयपदं संज्ञावाचकं भवति स: अव्ययीभावसमास:।

| **सामासिकपदम्** | **समासविग्रह:** |
|---|---|
| प्रतिदिनम् | दिनम् दिनम् |
| उपकृष्णम् | कृष्णस्य समीपम् |
| अनुरूपम् | रूपस्य योग्यम् |
| यथाशक्ति: | शक्तिम् अनतिक्रम्य |
| सचक्रम् | चक्रस्य सादृश्यम् |
| निर्मक्षिकम् | मक्षिकाणाम् अभाव: |

# प्रत्ययपरिचय:

**प्रत्ययस्य परिभाषा -** य: शब्द: धातो: प्रातिपदिकस्य वा अन्ते संयुज्य विशेषार्थस्य बोधं कारयति स: प्रत्यय:।

**अथवा**

'प्रातिपदिकशब्दानां धातूनां वा अन्ते ये प्रयुज्यन्ते ते प्रत्यया:।' उदाहरणेन स्पष्टं भविष्यति।

यथा - मोहन: खादति।

मोहन: पाठं पठति।

अधुना प्रत्ययस्य प्रयोगेण द्वयो: वाक्ययो: एकं वाक्यं रचयाम:।

यथा - मोहन: खादित्वा पाठं पठति।

अत्र क्त्वा प्रत्ययस्य प्रयोगेण वाक्यरचनाया: सरलीकरणं कृतम्। प्रत्यया: पञ्चधा भवन्ति। ते च -

1. सुप्-प्रत्यया:
2. तिङ्-प्रत्यया:
3. कृत्-प्रत्यया:
4. तद्धित-प्रत्यया:
5. स्त्री-प्रत्यया:

1. **सुप्-प्रत्यया: -** सुप्-प्रत्ययै: शब्दरूपाणि निर्मीयन्ते।
2. **तिङ्-प्रत्यया: -** तिङ्प्रत्ययै: धातुरूपाणि निर्मीयन्ते।
3. **कृत्-प्रत्यया: -** ये प्रत्यया: संज्ञासर्वनामविशेषणादि निष्पादनाय धातुभ्य: विधीयन्ते ते कृत् प्रत्यया: कथ्यन्ते।

यथा - तव्यत्, अनीयर्, शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन् आदय:।

**तव्यत्-प्रत्यय: -**

| | | | | | |
|---|---|---|---|---|---|
| उदाहरणम् | पठ् | + | तव्यत् | = | पठितव्यम् |
| | गम् | + | तव्यत् | = | गन्तव्यम् |
| **अनीयर् -** | दृश् | + | अनीयर् | = | दर्शनीयम् |
| | स्मृ | + | अनीयर् | = | स्मरणीयम् |
| **शतृ -** | पठ् | + | शतृ | = | पठन् |
| | हस् | + | शतृ | = | हसन् |
| **शानच् -** | वर्ध् | + | शानच् | = | वर्धमान: |
| | कम्प् | + | शानच् | = | कम्पमान: |
| **क्त -** | कथ् | + | क्त | = | कथित: |
| | गम् | + | क्त | = | गत: |
| **क्तवतु -** | कृ | + | क्तवतु | = | कृतवान् |
| | पठ् | + | क्तवतु | = | पठितवान् |
| **क्त्वा-** | दा | + | क्त्वा | = | दत्वा |
| | नी | + | क्त्वा | = | नीत्वा |
| **ल्यप् -** | आ | + | दा+ल्यप् | = | आदाय |
| | सम् | + | पठ्+ल्यप् | = | सम्पठ्य |
| **तुमुन् -** | कृ | + | तुमुन् | = | कर्तुम् |
| | जि | + | तुमुन् | = | जेतुम् |
| **क्तिन् -** | मन् | + | क्तिन् | = | मति: |
| | कृ | + | क्तिन् | = | कृति: |

**4 तद्धितप्रत्यया: -** ये प्रत्यया: संज्ञासर्वनामविशेषणादिशब्दै: विधीयन्ते ते तद्धितप्रत्यया: कथ्यन्ते ।

यथा - मतुप्, इन्, ठक्, त्व, त्रल् आदय: ।

| | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| **मतुप् -** | शक्ति | + | मतुप् | = | शक्तिमान् | गुण | + | मतुप् | = | गुणवान् |
| **इन् -** | ज्ञान | + | इन् | = | ज्ञानिन् (ज्ञानी) | गुण | + | इन् | = | गुणिन् (गुणी) |
| **ठक् (इक्)** | धर्म | + | ठक् | = | धार्मिक: | इतिहास | + | ठक् | = | ऐतिहासिक: |
| **त्व -** | लघु | + | त्व | = | लघुत्वम् | गुरु | + | त्व | = | गुरुत्वम् |
| **त्रल् -** | बहु | + | त्रल् | = | बहुत्र | सर्व | + | त्रल् | = | सर्वत्र |

**5. स्त्रीप्रत्यया: -** ये प्रत्यया: पुल्लिङ्गशब्देभ्य: स्त्रीलिङ्गशब्दरचनायै विधीयन्ते ते स्त्रीप्रत्यया: कथ्यन्ते ।

यथा - टाप्, ङीष्, ङीप्, ङीन् आदय: ।

| | | | | | |
|---|---|---|---|---|---|
| **टाप् -** | अज | + | टाप् | = | अजा (बकरी) |
| | बाल | + | टाप् | = | बाला (लड़की) |

**ङीप् -** **(अ)** ऋकारान्तनकरान्तपुंल्लिङ्गशब्दानां स्त्रीलिङ्ग निर्माणार्थं **ङीप्** प्रत्ययस्य प्रयोग: भवति (ऋन्नेभ्योङीप्)

**यथा**– कर्तृ + ङीप् = कर्त्री गुणिन् + ङीप् = गुणिनी

**(ब)** येषां शब्दानामन्ते 'कर' भवति तथा च टिदन्त शब्दानामनन्तरं **ङीप्** प्रत्यय: प्रयुज्ते।

**यथा**– (क) भोगकर + ङीप् = भोगकरी (ख) सुखकर + ङीप् = सुखकरी

(ग) देव (देवट्) + ङीप् = देवी

**(स)** द्विगु समासान्तशब्देषु **ङीप्** प्रत्ययस्य प्रयोगो भवति (द्विगोश्च)

**यथा** – त्रिलोक + ङीप् = त्रिलोकी

**(द)** एतादृशा: प्रत्यया: यत्र 'उ' 'ऋ' इति वर्णयो: लोप: स्यात् तत्रापि **ङीप्** प्रत्ययो भवति।

**यथा**– श्रीमत् + ङीप् = श्रीमती भवत् + ङीप् = भवती

**(ई)** प्रथमावस्था ज्ञातुं **ङीप्** प्रत्ययो भवति (वयसि प्रथमे)

**यथा**– कुमार + ङीप् = कुमारी किशोर + ङीप् = किशोरी

**ङीष् -** (अ) अकारान्तजातिवाचकशब्देषु यत्र उपधायां 'य' इति वर्ण: न भवेत् तत्र **ङीष्** भवति। (जातेरस्त्रीविषयादयोपधात्)

**यथा**– मानुष + ङीष् = मानुषी महिष + ङीष् = महिषी

(ब) उकारन्त गुणवाचिकशब्देभ्य: **ङीष्** प्रत्ययो भवति। (ओतोगुणवाचनात्)

**यथा**– मृदु + ङीष् = मृद्वी पटु + ङीष् = पट्वी

**ङीन् -** (नृनरयोश्च)

**यथा**– नर + **ङीन्** =नारी

# अव्ययपरिचयः

*सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।*
*वचनेषु च सर्वेषु यन्नव्ययेति तदव्ययम् ॥*

**यन्नव्ययेति तदव्ययम् -**

न व्ययम् इति अव्ययम् अर्थात् यत् न परिवर्तते तद् अव्ययम् इति। यत् त्रिषु लिङ्गेषु, सर्वेषु वचनेषु, सर्वासु विभक्तिषु च समानरूपं भवति तद् अव्ययमिति कथ्यते।

**अव्ययं पञ्चविधम् -**
(1) उपसर्गः
(2) क्रियाविशेषणम्
(3) चादिः
(4) समुच्चयबोधकः
(5) विस्मयादिबोधकश्च

**(1.) उपसर्गाः -** प्र, परा, अप, सम्, अनु, अव्, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप (एते प्रादयः) प्रादयः उपसर्गाः द्वाविंशतिसङ्ख्यकाः भवन्ति।

**उदाहरणं यथा -**

| क्रमाङ्कः | उपसर्गस्य नाम | अर्थः | उदाहरणम् |
|---|---|---|---|
| 1. | प्र | अधिकः, श्रेष्ठः | प्रणामः = अधिक झुकना<br>प्राचार्यः = श्रेष्ठ आचार्य |
| 2. | परा | पृष्ठतः, विपरीतम् (पीछे, उलटा) | पराजयः = हार, पराभवः = हार<br>परागतः = चला गया |
| 3. | अप | दूरम् (दूर) | अपहारः = दूर ले जाना<br>अपकारः = बुरा करना |
| 4. | सम् | सम्यक् प्रकारेण (अच्छी तरह) | संस्कारः = अच्छी तरह किया हुआ |
| 5. | अनु | पश्चात् सह (पीछे, साथ) | अनुगमनम् = पीछे चलना<br>अनुकरणम् = उसी तरह करना |
| 6. | अव | दूरम् , नीचैः (दूर, नीचे) | अवतारः = नीचे आना<br>अवमानः = नीचा मानना |
| 7. | निस् | बिना, बहिः (बिना, बाहर) | निस्सारः = सार रहित<br>निश्शङ्कः = शङ्का रहित |

| | | | |
|---|---|---|---|
| 8. | निर् | बहिः (बाहर) | निर्गमः = बाहर निकलना<br>निर्दोषः = दोष से रहित<br>(र परे होने पर निर् का नी हो जाता है<br>जैसे - नीरोग) |
| 9. | दुस् | कठिनम् | दुष्करः = करने में कठिन<br>दुस्सहः = सहने में कठिन |
| 10. | दुर् | असाधुः असम्यक् (बुरा) | दुराचारः = बुरा काम |
| 11. | वि | बिना, पृथक् (बिना, अलग) | विचलः = दूर चला हुआ<br>वियोगः = विरह |
| 12. | आङ् | पर्यन्तम्, न्यूनम् (तक, कम) | आच्छदः = चारों ओर तक ढँकना<br>आकम्पः = कुछ काँपना |
| 13. | नि | नीचैः (नीचे) | निपत् = नीचे गिरना |
| 14. | अधि | आधिक्यम्, प्रामुख्यम्<br>(अधिकता, प्रमुखता) | अधिकारः = प्रभुत्व/स्वामीत्व<br>(जिसमें दूसरे वश में हो) |
| 15. | अपि | निकटे (निकट/भी) | अपिधानम् = ढक्कन<br>(अपि का विकल्प से 'अ' लोप हो जाता है<br>जैसे-अपिधानम्) पिधानम् |
| 16. | अति | बाहुल्यम्, उल्लङ्घनम् | अतिक्रमः = सीमा का उल्लङ्घन<br>अतिनिद्रा = अधिक नींद |
| 17. | सु | सम्यक् (अच्छा) | सुयशः = अच्छा यश |
| 18. | उत् | ऊर्ध्वं (ऊपर) | उत्कर्षः = उन्नति<br>उत्क्षेपणम् = ऊपर की ओर फेंकना |
| 19. | अभि | अभिमुख (ओर) | अभिगमनम् - किसी की ओर जाना |
| 20. | प्रति | विपरीतः (ओर, उल्टा) | प्रतिवादः = खण्डन करना<br>प्रतिध्वनिः = परावर्तित ध्वनि |
| 21. | परि | परितः (चारों ओर) | परिवृतः = चारों ओर से घिरा हुआ |
| 22. | उप | निकटे (निकट) | उपासना = निकट बैठना |

(2) **क्रियाविशेषणानि -** कतिपय क्रियाविशेषणशब्दा: अपि अव्ययशब्दा: भवन्ति। यथा - अपि, इव, एव, कदा, कुत:, मा, इतस्तत:, यत् - तत्, अत्र-तत्र, यत्र-तत्र, यदा-कदा, यथा-तथा, यावत्-तावत्, शनै:।

| **अव्ययम्** | **वाक्यप्रयोग:** |
|---|---|
| अपि (भी) | मम ग्रामे अपि एक: वाचनालय: अस्ति। |
| इव (समान) | विद्या माता इव रक्षति। |
| एव (ही) | सदाचार: एव परमो धर्म:। |
| कदा (कब) | भवान् कदा आगमिष्यति ? |
| कुत: (कहाँ से) | गङ्गा कुत: निकसति ? |
| मा (नहीं) | कोलाहलं मा कुरुत। |
| इतस्तत: (इधर-उधर) | इतस्तत: मा गच्छन्तु। |
| यत्-तत् | यत् स्वास्थ्यकारकम् तत् ग्राह्यम्। |
| अत्र-(यहाँ) | अत्र वृक्षा: सन्ति। |
| तत्र-(वहाँ) | तत्र सरोवर: अस्ति। |
| यत्र-तत्र (जहाँ-वहाँ) | यत्र वायु अस्ति तत्र जीवनम् अस्ति। |
| यदा-तदा (जब-तब) | यदा शिक्षक: आगच्छति तदा छात्रा: तूष्णी भवन्ति। |
| यथा-तथा (जैसा, वैसा) (उस प्रकार) | यथा राजा तथा प्रजा |
| यावत्-तावत् (जब तक, तब तक जितना) | यावत् सा पठिष्यति तावत् अहमपि पठिष्यामि। |
| शनै: - धीरे-धीरे | शनै: शनै: वदतु। |

(3) **चादि: -** च, वा, भूय:, खलु, तु, वै, मा, न इत्यादय:। यथा -

| | |
|---|---|
| च-और | छात्र: संस्कृतं विज्ञानं च पठति। |
| वा-अथवा | भवान् नेता अभिनेता वा अस्ति ? |
| भूय:-पुन:, अधिक | छात्र: भूय: भूय: प्रश्नं पृच्छति। |
| तु | भवान् तु विद्वान् अस्ति। |

(4) **समुच्चयबोधक: -** अथ, उत, चेत्, नोचेत् इत्यादय:।

| | |
|---|---|
| अथ (आरम्भसूचक: शब्द) | अथ कथा प्रारभ्यते। |
| चेत्-नोचेत् (यदि-यदि नहीं) | लेखनी अस्ति चेत् लिखतु नोचेत् पठतु। |

(5) **विस्मयादिबोधक: -** अहह, अहो, बत, हा इत्यादय:।

अहो ! अधिकं शैत्यं वर्तते अद्य।

# कारकपरिचयः

**कारकं किम् -** (क्रियाजनकत्वं कारकत्वम्) साक्षात् क्रियान्वयित्वं कारकत्वम् अयमाशयो यत् यस्य पदस्य क्रियया सह साक्षात् सम्बन्धो भवति तत् कारकमित्युच्यते। तद्भेदाः चिह्नानि च निम्नानुसारेण वर्तन्ते -

| विभक्तयः | कारकाणि | चिह्नानि (हिन्दीभाषायाम्) |
|---|---|---|
| प्रथमा | कर्त्ता | ने |
| द्वितीया | कर्म | को |
| तृतीया | करणम् | से, द्वारा |
| चतुर्थी | सम्प्रदानम् | के लिये |
| पञ्चमी | अपादानम् | से (अलग होने अर्थ में) |
| षष्ठी | सम्बन्धः (विभक्तिरूपेण) | का, के, की, रा, रे, री |
| सप्तमी | अधिकरणम् | में, पर |
| सम्बोधनम् | - | हे, भो, अरे |

**विशेषः -** सम्बोधने प्रथमा विभक्तिः भवति।

**कर्ताकारकम् -** (प्रथमा विभक्तिः) करोति इति कर्ता। कर्ताकारके प्रथमा विभक्तिः भवति।

**यथा -** बालकः पठति।

रमा नृत्यति।

**कर्मकारकम् -** (द्वितीया विभक्तिः) कर्ता यम् अत्यधिकम् अभिलषति, तत् कर्मकारकम् इति कथ्यते।

**यथा -** रामः पुस्तकं पठति

राधा मन्दिरं गच्छति

महेशः जलं पिबति

**विशेषः -** शब्दैः सह विशेषविभक्तीनां प्रयोगः उपपदविभक्तिः इति।

(अभितः, उभयतः, परितः, निकषा, प्रति, धिक्, विना-एतेषां शब्दानां प्रयोगे द्वितीया स्यात्)

**यथा -** नृपम् अभितः परिचारकाः सन्ति।

उपवनं परितः जनाः भ्रमन्ति।

नगरं समया निकषा वा वनम् अस्ति।

बालकः विद्यालयं प्रति गच्छति।

धिक्! ज्ञानहीनम्।

जलं विना मीनः न जीवति।

**विशेषः -** विना योगे तृतीया, पञ्चमी विभक्तिः अपि भवति।

**करणकारकम् (तृतीया विभक्तिः)** - येन साधनेन कर्ता कार्यं सम्पादयति, तत् साधनं करणकारकमिति कथ्यते।

**यथा** - शिक्षकः सुधाखण्डेन लिखति।

बालकः वाहनेन गच्छति।

**विशेषः** - विना, अलम्, सह, हीनः इत्यादीनां शब्दानां योगेऽपि तृतीया विभक्तिः भवति।

**यथा** - जलेन विना जीवनं नास्ति।

अलं विवादेन। अलं कोलाहलेन।

अध्यापकेन सह छात्राः गच्छन्ति।

ज्ञानेन हीनः नरः न शोभते।

**सम्प्रदानकारकम् (चतुर्थी विभक्तिः)** - यस्य कृते किमपि कार्यं सम्पन्नं क्रियते, तस्मै चतुर्थी विभक्तिः सम्प्रदानकारकं वा भवति।

**यथा** - माता बालकाय दुग्धं ददाति।

धनिकः/नृपः दरिद्राय धनं ददाति।

**विशेषः** - नमः, स्वस्ति, स्वाहा, स्वधा, अलम्, रुच्, दा, क्रुध्, स्पृह्, असूय् इत्यादीनां योगे चतुर्थी विभक्तिः भवति।

ईश्वराय नमः।

बालकाय स्वस्ति।

अग्नये स्वाहा।

पित्रे स्वधा।

कृष्णाय मोदकं रोचते।

सः निर्धनाय भिक्षुकाय दानं ददाति।

परशुरामः लक्ष्मणाय क्रुध्यति।

रमेशः सुरेशाय असूयति।

**अपादानकारकम् (पञ्चमी विभक्तिः)** - यस्मात् स्थानात् वस्तुनः पृथक्करणं लक्ष्यते तत्र अपादानकारकं पञ्चमी विभक्तिः भवति।

**यथा** - सैनिकः अश्वात् पतति।

वृक्षात् पत्रं पतति।

गङ्गा हिमालयात् प्रभवति।

**सम्बन्धः (षष्ठी विभक्तिः)** - यत्र संज्ञा अथवा सर्वनामरूपेण कस्यापि वस्तुनः सम्बन्धः परिलक्ष्यते तत्र षष्ठी विभक्तिः भवति।

**यथा** - गणेशः शिवस्य पुत्रः।

रामस्य पुत्रः लवः।

**अधिकरणकारकम् (सप्तमी विभक्तिः)** - येन क्रियायाः आधारस्य ज्ञानं भवेत् अधिकरणकारकमुच्यते।

**यथा** - पुस्तकम् उत्पीठिकायाम् अस्ति।

धनं कोषे अस्ति।

नावः तडागे तरन्ति।

# अशुद्धिसंशोधनम्

## 1. वचनसम्बन्धी – (वचन-लिङ्ग-पुरुष-लकारदृष्ट्या)

| अशुद्धवाक्यम् | शुद्धवाक्यम् |
|---|---|
| सर्वे प्राणेन जीवन्ति। | सर्वे प्राणै: जीवन्ति। |
| सर्व: बालका धावन्ति। | सर्वे बालका: धावन्ति। |
| भारतवर्षे सरित: प्रवहति। | भारतवर्षे सरित: प्रवहन्ति। |
| मेघात् आप: वर्षति। | मेघात् आप: वर्षन्ति। |
| आचार्यपादे मे जीवनम्। | आचार्यपादयो: मे जीवनम्। |
| दम्पती आगत: अत्र। | दम्पती आगतौ अत्र। |
| शरीरे बहु: अस्थि अस्ति। | शरीरे बहूनि अस्थीनि सन्ति। |

## 2. लिङ्गसम्बन्धी –

| अशुद्धवाक्यम् | शुद्धवाक्यम् |
|---|---|
| द्वौ-द्वौ चत्वारो भवन्ति। | द्वे-द्वे चत्वारि भवन्ति। |
| मम शरीर: व्यथते। | मम शरीरं व्यथते। |
| पत्रा: पतन्ति। | पत्राणि पतन्ति। |
| एषा आत्मा दु:खी भवति। | एष: आत्मा दु:खी भवति। |
| जलाशयं गम्भीरम् वर्तते। | जलाशय: गम्भीर: अस्ति। |
| स: ईश्वरस्य वाक् वर्तते। | इयं ईश्वरस्य वाक् वर्तते। |
| अयं गङ्गाया: वारि अस्ति। | इदं गङ्गाया: वारि अस्ति। |
| तव गमन: कदा भविष्यति | तव गमनं कदा भविष्यति ? |

## 3. पुरुषसम्बन्धी –

| अशुद्धवाक्यम् | शुद्धवाक्यम् |
|---|---|
| सर्वे बालका: धावति। | सर्वे बालका: धावन्ति। |
| स मोदकं खादसि। | स: मोदकं खादति। |
| अहम् आपणं गच्छति। | अहम् आपणं गच्छामि। |
| आवां पुस्तकानि पठत:। | आवां पुस्तकानि पठाव:। |

| | |
|---|---|
| युवां नदीं पश्यामि। | युवां नदीं पश्यथः। |
| त्वं व्यर्थं वदति। | त्वं व्यर्थं वदसि। |
| ते प्रातः देवालये अर्चथ। | ते प्रातः देवालये अर्चन्ति। |
| वयं रात्रौ पठिष्यन्ति। | वयं रात्रौ पठिष्यामः। |
| भवान् कुत्र पश्यसि ? | भवान् कुत्र पश्यति ? |
| यूयं सम्यक् न लिखन्ति। | यूयं सम्यक् न लिखथ। |

**4. लकारसम्बन्धी –**

| **अशुद्धवाक्यम्** | **शुद्धवाक्यम्** |
|---|---|
| दशरथः अयोध्यायाः राजा अस्ति। | दशरथः अयोध्यायाः राजा आसीत्। |
| सः श्वः अस्मान् पाठयति। | सः श्वः अस्मान् पाठयिष्यति। |
| अहं परश्वः पाठशालां गच्छामि। | अहं परश्वः पाठशालां गमिष्यामि। |
| वयं ह्यः मन्दिरं गच्छामः। | वयं ह्यः मन्दिरं अगच्छाम। |
| अहं गृहे श्वः पठामि। | अहं गृहे श्वः पठिष्यामि। |
| त्वं जलं पिवस्यसि। | त्वं जलं पास्यसि। |
| भारतदेशः 1947 तमे वर्षे स्वतन्त्रः भविष्यति। | भारतदेशः 1947 तमे वर्षे स्वतन्त्रः अभवत्। |
| रामः लक्ष्मणेन सह वनम् अगच्छम्। | रामः लक्ष्मणेन सह वनम् अगच्छत्। |

**सामान्यअशुद्धयः –**

**संस्कृतलेखनकार्येषु प्रायः अधोनिर्दिष्टाः अशुद्धयः भवन्ति –**

1. वर्तनीसम्बद्धा त्रुटिः
2. कालसम्बद्धा त्रुटिः
3. कारकसम्बद्धा त्रुटिः
4. उपसर्गप्रत्ययविभक्तिसम्बद्धाःत्रुटयः
5. शब्दरचनासम्बद्धा त्रुटिः
6. लिङ्गसम्बद्धा त्रुटिः
7. वाक्ये पदक्रमसम्बद्धा त्रुटिः
8. कर्तृ-कर्म-क्रियाणाम्-अन्वयवसम्बद्धा त्रुटिः
9. विशेषविशेष्याणाम् अन्वयसम्बद्धा त्रुटिः
10. पदानाम् अर्थावबोधने त्रुटिः
11. तथ्यसम्बद्धा त्रुटिः
12. अनुच्छेदक्रमाभावः
13. सामान्य-अपवादनियमानां विषये त्रुटिः
14. सन्धिकरणे त्रुटिः
15. समाससम्बद्धा त्रुटिः

# सङ्ख्याबोध:

**सङ्ख्या: एकत: चतु: पर्यन्तम् त्रिषु लिङ्गेषु भवन्ति ।**

**यथा –**

| सङ्ख्या | पुल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| 1. | एक: | एका | एकम् |
| यथा - | एक: बालक: । | एका बालिका । | एकम् फलम् । |
| 2. | द्वौ | द्वे | द्वे |
| यथा - | द्वौ बालकौ । | द्वे बालिके । | द्वे फले |
| 3. | त्रय: | तिस्र: | त्रीणि |
| यथा - | त्रय: बालका: । | तिस्र: बालिका: । | त्रीणि फलानि । |
| 4. | चत्वार: | चतस्र: | चत्वारि |
| यथा - | चत्वार: बालका: । | चतस्र: बालिका: । | चत्वारि फलानि । |
| 5. | पञ्च | पञ्च | पञ्च |
| यथा - | पञ्च बालका: । | पञ्च बालिका: । | पञ्च फलानि । |

**ध्यातव्यम् –** एकत: चतु: पर्यन्तमेव सङ्ख्यासु लिङ्गभेद: भवति । पञ्चत: त्रिषुलिङ्गेषु रूपाणि समानमेव भवन्ति ।

## सङ्ख्या:

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1. | एकम् | 26. | षड्विंशति: | 51. | एकपञ्चाशत् | 76. | षट्सप्तति: |
| 2. | द्वे | 27. | सप्तविंशति: | 52. | द्विपञ्चाशत् | 77. | सप्तसप्तति: |
| 3. | त्रीणि | 28. | अष्टाविंशति: | 53. | त्रिपञ्चाशत् | 78. | अष्टसप्तति: |
| 4. | चत्वारि | 29. | नवविंशति: | 54. | चतुश्पञ्चाशत् | 79. | नवसप्तति: |
| 5. | पञ्च | 30. | त्रिंशत् | 55. | पञ्चपञ्चाशत् | 80. | अशीति: |
| 6. | षट् | 31. | एकत्रिंशत् | 56. | षट्पञ्चाशत् | 81. | एकाशीति: |
| 7. | सप्त | 32. | द्वात्रिंशत् | 57. | सप्तपञ्चाशत् | 82. | द्वयशीति: |
| 8. | अष्ट | 33. | त्रयस्त्रिंशत् | 58. | अष्टपञ्चाशत् | 83. | त्रयशीति: |
| 9. | नव | 34. | चतुस्त्रिंशत् | 59. | नवपञ्चाशत् | 84. | चतुरशीति: |
| 10. | दश | 35. | पञ्चत्रिंशत् | 60. | षष्टि: | 85. | पञ्चाशीति: |
| 11. | एकादश | 36. | षट्त्रिंशत् | 61. | एकषष्टि: | 86. | षडशीति: |
| 12. | द्वादश | 37. | सप्तत्रिंशत् | 62. | द्विषष्टि: | 87. | सप्ताशीति: |
| 13. | त्रयोदश | 38. | अष्टात्रिंशत् | 63. | त्रिषष्टि: | 88. | अष्टाशीति: |
| 14. | चतुर्दश | 39. | नवत्रिंशत् | 64. | चतु:षष्टि: | 89. | नवाशीति: |
| 15. | पञ्चदश | 40. | चत्वारिंशत् | 65. | पञ्चषष्टि: | 90. | नवति: |
| 16. | षोडश | 41. | एकचत्वारिंशत् | 66. | षट्षष्टि: | 91. | एकनवति: |
| 17. | सप्तदश | 42. | द्विचत्वारिंशत् | 67. | सप्तषष्टि: | 92. | द्विनवति: |
| 18. | अष्टादश | 43. | त्रिचत्वारिंशत् | 68. | अष्टषष्टि: | 93. | त्रिनवति: |
| 19. | नवदश | 44. | चतुश्चत्वारिंशत् | 69. | नवषष्टि: | 94. | चतुर्नवति: |
| 20. | विंशति: | 45. | पञ्चचत्वारिंशत् | 70. | सप्तति: | 95. | पञ्चनवति: |
| 21. | एकविंशति: | 46. | षटचत्वारिंशत् | 71. | एकसप्तति: | 96. | षण्णवति: |
| 22. | द्वाविंशति: | 47. | सप्तचत्वारिंशत् | 72. | द्विसप्तति: | 97. | सप्तनवति: |
| 23. | त्रयोविंशति: | 48. | अष्टचत्वारिंशत् | 73. | त्रिसप्तति: | 98. | अष्टनवति: |
| 24. | चतुर्विंशति: | 49. | नवचत्वारिंशत् | 74. | चतुस्सप्तति: | 99. | नवनवति: |
| 25. | पञ्चविंशति: | 50. | पञ्चाशत् | 75. | पञ्चसप्तति: | 100. | शतम् |

# समयज्ञानम्

**घटिकाचित्रसाहाय्येन अङ्कानां स्थाने संस्कृते समयलेखनम् -**

(सामान्य-सपाद्-सार्द्ध-पादोन)

## सामान्य - समयज्ञानम्



एकवादनम् (1:00)



द्विवादनम् (2:00)



त्रिवादनम् (3:00)



चतुर्वादनम् (4:00)



पञ्चवादनम् (5:00)



षड्वादनम् (6:00)



सप्तवादनम् (7:00)



अष्टवादनम् (8:00)



नववादनम् (9:00)



दशवादनम् ( 1:00 )



एकादशवादनम् (11:00)



द्वादशवादनम् (12:00)

**वाक्यप्रयोग: -**

**यथा -** इदानीं क: समय: ?

इदानीं चतुर्वादनम्।

इदानीं .............।

स: कदा गतवान् ?

स: पञ्चवादने गतवान्।

तपन: ......... आगमिष्यति।

## सपाद् - समयज्ञानम्




**सपादएकवादनम्** (1:15)




**सपादद्विवादनम्** (2:15)




**सपादत्रिवादनम्** (3:15)




**सपादचतुर्वादनम्** (4:15)




**सपादपञ्चवादनम्** (5:15)




**सपादषड्वादनम्** (6:15)




**सपादप्तवादनम्** (7:15)




**सपादअष्टवादनम्** (8:15)




**सपादनववादनम्** (9:15)




**सपादशवादनम्** (10:15)




**सपादएकादशवादनम्** (11:15)




**सपादद्वादशवादनम्** (12:15)

**वाक्यप्रयोग: -**

**यथा -** इदानीं क: समय: ?

इदानीं सपाद्त्रिवादनम्।

इदानीं ............।

विशाला कदा गतवती ?

विशाला सपाद्-एकादशवादने गतवती।

अम्बरीष: ................ गतवान्।

## सार्द्ध – समयज्ञानम्



सार्द्धएकवादनम् (1:30)



सार्द्धद्विवादनम् (2:30)



सार्द्धत्रिवादनम् (3:30)



सार्द्धचतुर्वादनम् (4:30)



सार्द्धपञ्चवादनम् (5:30)



सार्द्धषड्वादनम् (6:30)



सार्द्धसप्तवादनम् (7:30)



सार्द्धअष्टवादनम् (8:30)



सार्द्धनववादनम् (9:30)



सार्द्धदशवादनम् (10:30)



सार्द्धएकादशवादनम् (11:30)



सार्द्धद्वादशवादनम् (12:30)

**वाक्यप्रयोगः –**

**यथा –** इदानीं कः समयः ?

इदानीं सार्द्धद्विवादनम्।

इदानीं ............।

निधिः कदा गतवती ?

निधिः सार्द्धदशवादने गतवती।

वेदान्तः ................ गतवान्।

## पादोन - समयज्ञानम्



पादोनद्विवादनम् (1:45)



पादोनत्रिवादनम् (2:45)



पादोनचतुर्वादनम् (3:45)



पादोनपञ्चवादनम् (4:45)



पादोनषड्वादनम् (5:45)



पादोनसप्तवादनम् (6:45)



पादोनअष्टवादनम् (7:45)



पादोननववादनम् (8:45)



पादोनदशवादनम् (9:45)



पादोनएकादशवादनम् (10:45)



पादोनद्वादशवादनम् (11:45)



पादोनएकवादनम् (12:45)

**वाक्यप्रयोगः -**

**यथा -** इदानीं कः समयः ?

इदानीं पादोन-अष्टवादनम्।

इदानीं .............।

दिव्यांशः कदा विद्यालयं गच्छति ?

दिव्यांशः पादोनदशवादने विद्यालयं गच्छति।

सन्ध्या................ गृहम् आगच्छति।

# शब्दरूपाणि

## अकारान्तपुंल्लिङ्गः ''राम'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधनम् | हे राम ! | हे रामौ ! | हे रामाः ! |

## आकारान्तस्त्रीलिङ्गः ''रमा'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्याम् | रमाभिः |
| चतुर्थी | रमायै | रमाभ्याम् | रमाभ्यः |
| पञ्चमी | रमायाः | रमाभ्याम् | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| सम्बोधनम् | हे रमे ! | हे रमे ! | हे रमाः ! |

## इकारान्तपुंल्लिङ्गः ''कवि'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कविः | कवी | कवयः |
| द्वितीया | कविम् | कवी | कवीन् |
| तृतीया | कविना | कविभ्याम् | कविभिः |
| चतुर्थी | कवये | कविभ्याम् | कविभ्यः |
| पञ्चमी | कवेः | कविभ्याम् | कविभ्यः |
| षष्ठी | कवेः | कव्योः | कवीनाम् |
| सप्तमी | कवौ | कव्योः | कविषु |
| सम्बोधनम् | हे कवे ! | हे कवी ! | हे कवयः ! |

## उकारान्तपुंल्लिङ्गः ''साधु'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | साधुः | साधू | साधवः |
| द्वितीया | साधुम् | साधू | साधून् |
| तृतीया | साधुना | साधुभ्याम् | साधुभिः |
| चतुर्थी | साधवे | साधुभ्याम् | साधुभ्यः |
| पञ्चमी | साधोः | साधुभ्याम् | साधुभ्यः |
| षष्ठी | साधोः | साध्वोः | साधूनाम् |
| सप्तमी | साधौ | साध्वोः | साधुषु |
| सम्बोधनम् | हे साधो ! | हे साधू ! | हे साधवः ! |

## ऋकारान्तपुंल्लिङ्गः ''पितृ'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधनम् | हे पितः ! | हे पितरौ ! | हे पितरः ! |

## नकारान्तनपुंसकलिङ्गः ''नामन्'' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नाम | नाम्नी | नामानि |
| द्वितीया | नाम | नाम्नी | नामानि |
| तृतीया | नाम्ना | नामभ्याम् | नामभिः |
| चतुर्थी | नाम्ने | नामभ्याम् | नामभ्यः |
| पञ्चमी | नाम्नः | नामभ्याम् | नामभ्यः |
| षष्ठी | नाम्नः | नाम्नोः | नाम्नाम् |
| सप्तमी | नाम्नि | नाम्नोः | नामसु |
| सम्बोधनम् | हे नाम ! | हे नाम्नी ! | हे नामानि ! |

## तकारान्तपुंल्लिङ्गः ''भवत्'' शब्दः (आप)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भवान् | भवन्तौ | भवन्तः |
| द्वितीया | भवन्तम् | भवन्तौ | भवतः |
| तृतीया | भवता | भवद्भ्याम् | भवद्भिः |
| चतुर्थी | भवते | भवद्भ्याम् | भवद्भ्यः |
| पञ्चमी | भवतः | भवद्भ्याम् | भवद्भ्यः |
| षष्ठी | भवतः | भवतोः | भवताम् |
| सप्तमी | भवति | भवतोः | भवत्सु |
| सम्बोधनम् | हे भवन् ! | हे भवन्तौ ! | हे भवन्तः ! |

## नकारान्तपुंल्लिङ्गः ''राजन्'' शब्दः (राजा)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | राजा | राजानौ | राजानः |
| द्वितीया | राजानम् | राजानौ | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |
| पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| सप्तमी | राज्ञि, राजनि | राज्ञोः | राजसु |
| सम्बोधनम् | हे राजन् ! | हे राजानौ ! | हे राजानः ! |

# सर्वनामशब्दाः

## ''अस्मद्'' शब्दः (मैं)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | वयम् |
| द्वितीया | माम्, मा | आवाम्, नौ | अस्मान्, नः |
| तृतीया | मया | आवाभ्याम् | अस्माभिः |
| चतुर्थी | मह्यम्, मे | आवाभ्याम्, नौ | अस्मभ्यम्, नः |
| पञ्चमी | मत् | आवाभ्याम् | अस्मत् |
| षष्ठी | मम, मे | आवयोः नौ | अस्माकम्, नः |
| सप्तमी | मयि | आवयोः | अस्मासु |

## ''युष्मद्'' शब्दः (तुम)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | त्वम् | युवाम् | यूयम् |
| द्वितीया | त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः |
| तृतीया | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः |
| पञ्चमी | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | तव, ते | युवयोः, वाम् | युष्माकम्, वः |
| सप्तमी | त्वयि | युवयोः | युष्मासु |

## पुंल्लिङ्गः ''तत्'' शब्दः (वह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| द्वितीया | तम् | तौ | तान् |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## स्त्रीलिङ्गः ''तत्'' शब्दः (वह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सा | ते | ताः |
| द्वितीया | ताम् | ते | ताः |
| तृतीया | तया | ताभ्याम् | ताभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् |
| सप्तमी | तस्याम् | तयोः | तासु |

## नपुंसकलिङ्गः ''तत्'' शब्दः (वह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तत् | ते | तानि |
| द्वितीया | तत् | ते | तानि |
| तृतीया | तेन | ताभ्याम् | तैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु |

## पुंल्लिङ्गः ''किम्'' शब्दः (क्या)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कः | कौ | के |
| द्वितीया | कम् | कौ | कान् |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## स्त्रीलिङ्गः ''किम्'' शब्दः (क्या)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | का | के | काः |
| द्वितीया | काम् | के | काः |
| तृतीया | कया | काभ्याम् | काभिः |
| चतुर्थी | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | कस्याः | कयोः | कासाम् |
| सप्तमी | कस्याम् | कयोः | कासु |

## नपुंसकलिङ्गः ''किम्'' शब्दः (क्या)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | किम् | के | कानि |
| द्वितीया | किम् | के | कानि |
| तृतीया | केन | काभ्याम् | कैः |
| चतुर्थी | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | कस्य | कयोः | केषाम् |
| सप्तमी | कस्मिन् | कयोः | केषु |

## पुंल्लिङ्गः ''एतत्'' शब्दः (यह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषः | एतौ | एते |
| द्वितीया | एतम्, एनम् | एतौ, एनौ | एतान्, एनान् |
| तृतीया | एतेन, एनेन | एताभ्याम् | एतैः |
| चतुर्थी | एतस्मै | एताभ्याम् | एतेभ्यः |
| पञ्चमी | एतस्मात् | एताभ्याम् | एतेभ्यः |
| षष्ठी | एतस्य | एतयोः, एनयोः | एतेषाम् |
| सप्तमी | एतस्मिन् | एतयोः, एनयोः | एतेषु |

## स्त्रीलिङ्गः ''एतत्'' शब्दः (यह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एषा | एते | एताः |
| द्वितीया | एताम्, एनाम् | एते, एने | एताः, एनाः |
| तृतीया | एतया, एनया | एताभ्याम् | एताभिः |
| चतुर्थी | एतस्यै | एताभ्याम् | एताभ्यः |
| पञ्चमी | एतस्याः | एताभ्याम् | एताभ्यः |
| षष्ठी | एतस्याः | एतयोः, एनयोः | एतासाम् |
| सप्तमी | एतस्याम् | एतयोः, एनयोः | एतासु |

## नपुंसकलिङ्गः ''एतत्'' शब्दः (यह)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | एतत् | एते | एतानि |
| द्वितीया | एतत्, एनत् | एते | एतानि |

- तृतीयातः सप्तमीपर्यन्तं पुंल्लिङ्गवद् रूपाणि भवन्ति ।

# धातुरूपाणि

## परस्मैपदिन:

### ''भू'' (भव्) होना लट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | भवति | भवत: | भवन्ति |
| मध्यमपुरुष: | भवसि | भवथ: | भवथ |
| उत्तमपुरुष: | भवामि | भवाव: | भवाम: |

### लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुष: | अभव: | अभवतम् | अभवत |
| उत्तमपुरुष: | अभवम् | अभवाव | अभवाम |

### लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | भविष्यति | भविष्यत: | भविष्यन्ति |
| मध्यमपुरुष: | भविष्यसि | भविष्यथ: | भविष्यथ |
| उत्तमपुरुष: | भविष्यामि | भविष्याव: | भविष्याम: |

### लोट्लकार: (आज्ञार्थे)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | भवतु | भवताम् | भवन्तु |
| मध्यमपुरुष: | भव | भवतम् | भवत |
| उत्तमपुरुष: | भवानि | भवाव | भवाम |

### विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | भवेत् | भवेताम् | भवेयु: |
| मध्यमपुरुष: | भवे: | भवेतम् | भवेत |
| उत्तमपुरुष: | भवेयम् | भवेव | भवेम |

## गम् (गच्छ्) जाना लट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | गच्छति | गच्छत: | गच्छन्ति |
| मध्यमपुरुष: | गच्छसि | गच्छथ: | गच्छथ |
| उत्तमपुरुष: | गच्छामि | गच्छाव: | गच्छाम: |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुष: | अगच्छ: | अगच्छतम् | अगच्छत |
| उत्तमपुरुष: | अगच्छम् | अगच्छाव | अगच्छाम |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | गमिष्यति | गमिष्यत: | गमिष्यन्ति |
| मध्यमपुरुष: | गमिष्यसि | गमिष्यथ: | गमिष्यथ |
| उत्तमपुरुष: | गमिष्यामि | गमिष्याव: | गमिष्याम: |

## लोट्लकार: (आज्ञार्थे)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यमपुरुष: | गच्छ | गच्छतम् | गच्छत |
| उत्तमपुरुष: | गच्छानि | गच्छाव | गच्छाम |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | गच्छेत् | गच्छेताम् | गच्छेयु: |
| मध्यमपुरुष: | गच्छे: | गच्छेतम् | गच्छेत |
| उत्तमपुरुष: | गच्छेयम् | गच्छेव | गच्छेम |

## दृश् (पश्य्) देखना लट् लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पश्यति | पश्यत: | पश्यन्ति |
| मध्यमपुरुष: | पश्यसि | पश्यथ: | पश्यथ |
| उत्तमपुरुष: | पश्यामि | पश्याव: | पश्याम: |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अपश्यत् | अपश्यताम् | अपश्यन् |
| मध्यमपुरुष: | अपश्य: | अपश्यतम् | अपश्यत |
| उत्तमपुरुष: | अपश्यम् | अपश्याव | अपश्याम |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | द्रक्ष्यति | द्रक्ष्यत: | द्रक्ष्यन्ति |
| मध्यमपुरुष: | द्रक्ष्यसि | द्रक्ष्यथ: | द्रक्ष्यथ |
| उत्तमपुरुष: | द्रक्ष्यामि | द्रक्ष्याव: | द्रक्ष्याम: |

## लोट्लकार: (आज्ञार्थे)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पश्यतु | पश्यताम् | पश्यन्तु |
| मध्यमपुरुष: | पश्य | पश्यतम् | पश्यत |
| उत्तमपुरुष: | पश्यानि | पश्याव | पश्याम |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पश्येत् | पश्येताम् | पश्येयु: |
| मध्यमपुरुष: | पश्ये: | पश्येतम् | पश्येत |
| उत्तमपुरुष: | पश्येयम् | पश्येव | पश्येम |

## पच् (पकाना) लट् लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पचति | पचत: | पचन्ति |
| मध्यमपुरुष: | पचसि | पचथ: | पचथ |
| उत्तमपुरुष: | पचामि | पचाव: | पचाम: |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अपचत् | अपचताम् | अपचन् |
| मध्यमपुरुष: | अपच: | अपचतम् | अपचत |
| उत्तमपुरुष: | अपचम् | अपचाव | अपचाम |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पक्ष्यति | पक्ष्यत: | पक्ष्यन्ति |
| मध्यमपुरुष: | पक्ष्यसि | पक्ष्यथ: | पक्ष्यथ |
| उत्तमपुरुष: | पक्ष्यामि | पक्ष्याव: | पक्ष्याम: |

## लोट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पचतु | पचताम् | पचन्तु |
| मध्यमपुरुष: | पच | पचतम् | पचत |
| उत्तमपुरुष: | पचानि | पचाव | पचाम |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पचेत् | पचेताम् | पचेयु: |
| मध्यमपुरुष: | पचे: | पचेतम् | पचेत |
| उत्तमपुरुष: | पचेयम् | पचेव | पचेम |

## पा–(पिब्) पीना लट् लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पिबति | पिबत: | पिबन्ति |
| मध्यमपुरुष: | पिबसि | पिबथ: | पिबथ |
| उत्तमपुरुष: | पिबामि | पिबाव: | पिबाम: |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अपिबत् | अपिबताम् | अपिबन् |
| मध्यमपुरुष: | अपिब: | अपिबतम् | अपिबत |
| उत्तमपुरुष: | अपिबम् | अपिबाव | अपिबाम |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पास्यति | पास्यत: | पास्यन्ति |
| मध्यमपुरुष: | पास्यसि | पास्यथ: | पास्यथ |
| उत्तमपुरुष: | पास्यामि | पास्याव: | पास्याम: |

## लोट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पिबतु | पिबताम् | पिबन्तु |
| मध्यमपुरुष: | पिब | पिबतम् | पिबत |
| उत्तमपुरुष: | पिबानि | पिबाव | पिबाम |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | पिबेत् | पिबेताम् | पिबेयु: |
| मध्यमपुरुष: | पिबे: | पिबेतम् | पिबेत |
| उत्तमपुरुष: | पिबेयम् | पिबेव | पिबेम |

## आत्मनेपदिन:

## लभ् (पाना) लट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लभते | लभेते | लभन्ते |
| मध्यमपुरुष: | लभसे | लभेथे | लभध्वे |
| उत्तमपुरुष: | लभे | लभावहे | लभामहे |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अलभत | अलभेताम् | अलभन्त |
| मध्यमपुरुष: | अलभथा: | अलभेथाम् | अलभध्वम् |
| उत्तमपुरुष: | अलभे | अलभावहि | अलभामहि |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लप्स्यते | लप्स्येते | लप्स्यन्ते |
| मध्यमपुरुष: | लप्स्यसे | लप्स्येथे | लप्स्यध्वे |
| उत्तमपुरुष: | लप्स्ये | लप्स्यावहे | लप्स्यामहे |

## लोट्लकार: (आज्ञार्थे)

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लभताम् | लभेताम् | लभन्ताम् |
| मध्यमपुरुष: | लभस्व | लभेथाम् | लभध्वम् |
| उत्तमपुरुष: | लभै | लभावहै | लभामहै |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | लभेत | लभेयाताम् | लभेरन् |
| मध्यमपुरुष: | लभेथा: | लभेयाथाम् | लभेध्वम् |
| उत्तमपुरुष: | लभेय | लभेवहि | लभेमहि |

## सेव् (सेवा करना) लट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेवते | सेवेते | सेवन्ते |
| मध्यमपुरुष: | सेवसे | सेवेथे | सेवध्वे |
| उत्तमपुरुष: | सेवे | सेवावहे | सेवामहे |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | असेवत | असेवेताम् | असेवन्त |
| मध्यमपुरुष: | असेवथा: | असेवेथाम् | असेवध्वम् |
| उत्तमपुरुष: | असेवे | असेवावहि | असेवामहि |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमपुरुष: | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमपुरुष: | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

## लोट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यमपुरुष: | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तमपुरुष: | सेवै | सेवावहै | सेवामहै |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | सेवेत | सेवेयाताम् | सेवेरन् |
| मध्यमपुरुष: | सेवेथा: | सेवेयाथाम् | सेवेध्वम् |
| उत्तमपुरुष: | सेवेय | सेवेवहि | सेवेमहि |

## वृध् (बढ़ना) लट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्धते | वर्धेते | वर्धन्ते |
| मध्यमपुरुष: | वर्धसे | वर्धेथे | वर्धध्वे |
| उत्तमपुरुष: | वर्धे | वर्धावहे | वर्धामहे |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अवर्धत | अवर्धेताम् | अवर्धन्त |
| मध्यमपुरुष: | अवर्धथा: | अवर्धेथाम् | अवर्धध्वम् |
| उत्तमपुरुष: | अवर्धे | अवर्धावहि | अवर्धामहि |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्धिष्यते | वर्धिष्येते | वर्धिष्यन्ते |
| मध्यमपुरुष: | वर्धिष्यसे | वर्धिष्येथे | वर्धिष्यध्वे |
| उत्तमपुरुष: | वर्धिष्ये | वर्धिष्यावहे | वर्धिष्यामहे |

## लोट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्धताम् | वर्धेताम् | वर्धन्ताम् |
| मध्यमपुरुष: | वर्धस्व | वर्धेथाम् | वर्धध्वम् |
| उत्तमपुरुष: | वर्धै | वर्धावहै | वर्धामहै |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्धेत | वर्धेयाताम् | वर्धेरन् |
| मध्यमपुरुष: | वर्धेथा: | वर्धेयाथाम् | वर्धेध्वम् |
| उत्तमपुरुष: | वर्धेय | वर्धेवहि | वर्धेमहि |

## वृत् (होना) लट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्तते | वर्तेते | वर्तन्ते |
| मध्यमपुरुष: | वर्तसे | वर्तेथे | वर्तध्वे |
| उत्तमपुरुष: | वर्ते | वर्तावहे | वर्तामहे |

## लङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | अवर्तत | अवर्तेताम् | अवर्तन्त |
| मध्यमपुरुष: | अवर्तथा: | अवर्तेथाम् | अवर्तध्वम् |
| उत्तमपुरुष: | अवर्ते | अवर्तावहि | अवर्तामहि |

## लृट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते |
| मध्यमपुरुष: | वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे |
| उत्तमपुरुष: | वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे |

## लोट्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्तताम् | वर्तेताम् | वर्तन्ताम् |
| मध्यमपुरुष: | वर्तस्व | वर्तेथाम् | वर्तध्वम् |
| उत्तमपुरुष: | वर्तै | वर्तावहै | वर्तामहै |

## विधिलिङ्लकार:

| पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुष: | वर्तेत | वर्तेयाताम् | वर्तेरन् |
| मध्यमपुरुष: | वर्तेथा: | वर्तेयाथाम् | वर्तेध्वम् |
| उत्तमपुरुष: | वर्तेय | वर्तेवहि | वर्तेमहि |

## उभयपदिन:

## नी (ले जाना) लट्लकार:

परस्मैपदी | आत्मनेपदी

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| नयति | नयत: | नयन्ति | **प्रथमपुरुष:** | नयते | नयेते | नयन्ते |
| नयसि | नयथ: | नयथ | **मध्यमपुरुष:** | नयसे | नयेथे | नयध्वे |
| नयामि | नयाव: | नयाम: | **उत्तमपुरुष:** | नये | नयावहे | नयामहे |

## लङ्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| अनयत् | अनयताम् | अनयन् | **प्रथमपुरुष:** | अनयत | अनयेताम् | अनयन्त |
| अनय: | अनयतम् | अनयत | **मध्यमपुरुष:** | अनयथा: | अनयेथाम् | अनयध्वम् |
| अनयम् | अनयाव | अनयाम | **उत्तमपुरुष:** | अनये | अनयावहि | अनयामहि |

## लृट्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| नेष्यति | नेष्यत: | नेष्यन्ति | **प्रथमपुरुष:** | नेष्यते | नेष्येते | नेष्यन्ते |
| नेष्यसि | नेष्यथ: | नेष्यथ | **मध्यमपुरुष:** | नेष्यसे | नेष्येथे | नेष्यध्वे |
| नेष्यामि | नेष्याव: | नेष्याम: | **उत्तमपुरुष:** | नेष्ये | नेष्यावहे | नेष्यामहे |

## लोट्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| नयतु | नयताम् | नयन्तु | **प्रथमपुरुष:** | नयताम् | नयेताम् | नयन्ताम् |
| नय | नयतम् | नयत | **मध्यमपुरुष:** | नयस्व | नयेथाम् | नयध्वम् |
| नयानि | नयाव | नयाम | **उत्तमपुरुष:** | नयै | नयावहै | नयामहै |

## विधिलिङ्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| नयेत् | नयेताम् | नयेयु: | **प्रथमपुरुष:** | नयेत | नयेयाताम् | नयेरन् |
| नये: | नयेतम् | नयेत | **मध्यमपुरुष:** | नयेथा: | नयेयाथाम् | नयेध्वम् |
| नयेयम् | नयेव | नयेम | **उत्तमपुरुष:** | नयेय | नयेवहि | नयेमहि |

## हृ (हरना) लट्लकार:

परस्मैपदी | आत्मनेपदी

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| हरति | हरत: | हरन्ति | **प्रथमपुरुष:** | हरते | हरेते | हरन्ते |
| हरसि | हरथ: | हरथ | **मध्यमपुरुष:** | हरसे | हरेथे | हरध्वे |
| हरामि | हराव: | हराम: | **उत्तमपुरुष:** | हरे | हरावहे | हरामहे |

## लङ्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| अहरत् | अहरताम् | अहरन् | **प्रथमपुरुष:** | अहरत | अहरेताम् | अहरन्त |
| अहर: | अहरतम् | अहरत | **मध्यमपुरुष:** | अहरथा: | अहरेथाम् | अहरध्वम् |
| अहरम् | अहराव | अहराम | **उत्तमपुरुष:** | अहरे | अहरावहि | अहरामहि |

## लृट्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| हरिष्यति | हरिष्यत: | हरिष्यन्ति | **प्रथमपुरुष:** | हरिष्यते | हरिष्येते | हरिष्यन्ते |
| हरिष्यसि | हरिष्यथ: | हरिष्यथ | **मध्यमपुरुष:** | हरिष्यसे | हरिष्येथे | हरिष्यध्वे |
| हरिष्यामि | हरिष्याव: | हरिष्याम: | **उत्तमपुरुष:** | हरिष्ये | हरिष्यावहे | हरिष्यामहे |

## लोट्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| हरतु | हरताम् | हरन्तु | **प्रथमपुरुष:** | हरताम् | हरेताम् | हरन्ताम् |
| हर | हरतम् | हरत | **मध्यमपुरुष:** | हरस्व | हरेथाम् | हरध्वम् |
| हराणि | हराव | हराम | **उत्तमपुरुष:** | हरै | हरावहै | हरामहै |

## विधिलिङ्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| हरेत् | हरेताम् | हरेयु: | **प्रथमपुरुष:** | हरेत | हरेयाताम् | हरेरन् |
| हरे: | हरेतम् | हरेत | **मध्यमपुरुष:** | हरेथा: | हरेयाथाम् | हरेध्वम् |
| हरेयम् | हरेव | हरेम | **उत्तमपुरुष:** | हरेय | हरेवहि | हरेमहि |

## याच् (माँगना) लट्लकार:

परस्मैपदी | आत्मनेपदी

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| याचति | याचतः | याचन्ति | **प्रथमपुरुषः** | याचते | याचेते | याचन्ते |
| याचसि | याचथः | याचथ | **मध्यमपुरुषः** | याचसे | याचेथे | याचध्वे |
| याचामि | याचावः | याचामः | **उत्तमपुरुषः** | याचे | याचावहे | याचामहे |

## लङ्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| अयाचत् | अयाचताम् | अयाचन् | **प्रथमपुरुषः** | अयाचत | अयाचेताम् | अयाचन्त |
| अयाचः | अयाचतम् | अयाचत | **मध्यमपुरुषः** | अयाचथाः | अयाचेथाम् | अयाचध्वम् |
| अयाचम् | अयाचाव | अयाचाम | **उत्तमपुरुषः** | अयाचे | अयाचावहि | अयाचामहि |

## लृट्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| याचिष्यति | याचिष्यतः | याचिष्यन्ति | **प्रथमपुरुषः** | याचिष्यते | याचिष्येते | याचिष्यन्ते |
| याचिष्यसि | याचिष्यथः | याचिष्यथ | **मध्यमपुरुषः** | याचिष्यसे | याचिष्येथे | याचिष्यध्वे |
| याचिष्यामि | याचिष्यावः | याचिष्यामः | **उत्तमपुरुषः** | याचिष्ये | याचिष्यावहे | याचिष्यामहे |

## लोट्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| याचतु | याचताम् | याचन्तु | **प्रथमपुरुषः** | याचताम् | याचेताम् | याचन्ताम् |
| याच | याचतम् | याचत | **मध्यमपुरुषः** | याचस्व | याचेथाम् | याचध्वम् |
| याचानि | याचाव | याचाम | **उत्तमपुरुषः** | याचै | याचावहै | याचामहै |

## विधिलिङ्लकार:

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|---|
| याचेत् | याचेताम् | याचेयुः | **प्रथमपुरुषः** | याचेत | याचेयाताम् | याचेरन् |
| याचेः | याचेतम् | याचेत | **मध्यमपुरुषः** | याचेथाः | याचेयाथाम् | याचेध्वम् |
| याचेयम् | याचेव | याचेम | **उत्तमपुरुषः** | याचेय | याचेवहि | याचेमहि |

# अपठित-अवबोधनम्

## (सरल-गद्यांश-आधारितकार्यम्)

**(अ)** जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। जन्मभूमि: स्वर्गात् उत्कृष्टतरा अस्ति। सा लोकानां शरणदायिनी, विविधखाद्यपदार्थ-प्रदायिनी, सर्वव्यवहाराणां लीलाभूमि: च अस्ति। वैदिक: ऋषि: कथयति - माता भूमि: पुत्रोऽहं पृथिव्या:। वयं राष्ट्रियभावनां, राष्ट्रियचरित्रं, त्यागभावनां विना राष्ट्रस्य संरक्षणं कर्तुं न पारयाम:। परस्परैक्यभावनां विना राष्ट्रं कदापि समृद्धं न भवति। अत: अस्माभि: स्वार्थं परित्यज्य देशस्य देशवासिनां च सेवा सततं करणीया।

**उपर्युक्तगद्यांशं पठित्वा अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

1. जन्मभूमि: कस्मात् गरीयसी ?
2. 'माता भूमि:' इति क: कथयति ?
3. अस्य गद्यांशस्य सारं लिखत।
4. 'स्वर्गात्' शब्दे का विभक्ति: अस्ति?

**(आ)** अस्मिन् जगति सर्वधनेषु विद्यैव सर्वश्रेष्ठं धनम्। विद्याधनेन विहीन: य: मानव: अस्ति स: मूर्ख: असभ्य: इति कथ्यते। ज्ञानेन विना यथा पशु: धर्म-अधर्मयो: विचारं कर्तुं न शक्नोति तथैव मानवोऽपि विद्यया विहीन: पापपुण्ययो: कर्त्तव्य-अकर्त्तव्ययो: विचारं कर्तुं न समर्थ:। विद्याविहीन: मानव: अन्ध: एव इति कथ्यते।

**उपर्युक्तगद्यांशं पठित्वा अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

1. उपर्युक्तगद्यांशस्य शीर्षकं लिखत।
2. पशु: कयो: विचारं कर्तुं न शक्नोति ?
3. कीदृश: मानव: अन्ध: एव इति कथ्यते ?
4. उपर्युक्तगद्यांशस्य सारं लिखत।
5. 'विना' योगे का विभक्ति: भवति?

**(इ)** शरीरं धर्मस्य प्रथमं साधनम् अस्ति - 'शरीरमाद्यं खलु धर्मसाधनम्'। शरीरस्य आरोग्यं व्यायामेन सिध्यति। य: व्यायामं करोति तस्य प्राणशक्ते: आपद: स्वयमेव दूरं गच्छन्ति। व्यायामेन शरीरे शुद्धरक्तसञ्चार: भवति। इन्द्रियाणि सुस्थानि स्वस्थानि च भवन्ति। जठराग्नि: दीप्त: भवति। परिवृद्धम् उदरं सङ्कोचं गच्छति। मस्तिष्कम् उर्वरं भवति। अस्मिन् लोके जनै: वयोऽनुसारं कोऽपि व्यायाम: अवश्यं करणीय:।

**उपर्युक्तगद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत -**

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।
2. धर्मस्य प्रथमं साधनं किम् अस्ति ?
3. कीदृशम् उदरं व्यायामेन सङ्कोचं गच्छति?
4. अस्य गद्यांशस्य सारं लिखत।
5. गच्छन्ति इति पदे का धातु: अस्ति ?

**(ई)** सतां सज्जनानां, सङ्गति: सम्पर्क:, संसर्गो वा सत्सङ्गति: इति कथ्यते। वस्तुत: सत्सङ्गात् एव मानव: समुन्नतो भवति। सज्जनानां संसर्गेण जन: सज्जन: भवति, दुर्जनानां संसर्गेण च दुर्जन: भवति। स्थाने एवोक्तं "संसर्गजा दोषगुणा भवन्ति" इति। अत: स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेव सङ्गतिर्विधेया।

**उपर्युक्तगद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत -**

1. अस्य गद्यांशस्य शीर्षकं लिखत।
2. केन जन: सज्जन: भवति ?
3. स्वसमुन्नतिम् इच्छता जनेन किं करणीयम् ?
4. गद्यांशस्यास्य सारं लिखत।
5. दुर्जन: शब्दस्य विलोमशब्दं लिखत।

# पत्रम्

## अवकाशार्थं प्रार्थनापत्रम्

**श्रीमन्तः प्राचार्यमहोदयाः,**

शासकीय-उत्कृष्ट-उच्चतर-माध्यमिकविद्यालयः

भिण्डनगरम्, मध्यप्रदेशः

**विषयः - अवकाशार्थं प्रार्थनापत्रम् ।**

**श्रीमन्तः,**

सेवायां सविनयं निवेदनम् इदं यद् अहम् अद्य अकस्माद् ज्वरपीड़ितः अस्मि । अत एव विद्यालयम् आगन्तुं सर्वथा असमर्थः अस्मि । कृपया पञ्चदिवसानां (पञ्चदिनाङ्कतः नव-दिनाङ्क-पर्यन्तम्) अवकाशं यच्छन्तु इति । सविविनयं प्रार्थयामि ।

**दिनाङ्कः** 04/01/2008

**भवदीयः शिष्यः**

**यजुषः**

**कक्षा-दशमी 'अ' वर्गः**

## छात्रवृत्यर्थम् आवेदनपत्रम्

**माननीयाः प्राचार्यमहोदयाः,**

शासकीय-उच्चतर-माध्यमिकविद्यालयः,

रहलीनगरम्, मध्यप्रदेशः

**विषयः-छात्रवृत्ति-प्रदानार्थम् आवेदनम् ।**

**महोदयाः,**

अहं सविनयं निवेदयामि यत् मम पितुः आर्थिकस्थितिः शोचनीया वर्तते । अहं शिक्षण-शुल्कम् अपि दातुम् असमर्था अस्मि । अतः मम कृते श्रीमन्तः छात्रवृत्तिं दापयन्तु इति प्रार्थये ।

**दिनाङ्कः** 21/08/2008

**विनयावता**

**अनुपमा मिश्रा**

**कक्षा-दशमी 'ब' वर्गः**

## जन्मदिवसोत्सवस्य आमन्त्रणम्

**मान्या:**

**नमोनम:,**

महता हर्षेण सूचयामि यत् मम पुत्रस्य मन्थनस्य प्रथमजन्मदिवस: 03/02/2008 दिनाङ्के रविवासरे समायोजित: अस्ति।

कृपया अवसरेऽस्मिन् अवश्यं समागत्य बालकाय स्वकीयं शुभाशीषं दत्वा कृतार्थयन्तु भवन्त:।

**स्थानम् -** भैसोदामण्डीनगरम्

**दिनाङ्क: -**03/02/2008

**समय: -** सायं 6 वादनत: 8 वादनपर्यन्तम्

**विनम्र:**
**पीयूषदीक्षित:**

## शुभकामनापत्रम्

**वेदनगरम्, उज्जयिनीत:**

**दिनाङ्क:** 23/06/2008

**प्रियमित्र, प्रत्युष !**

**सप्रेम नमस्ते !**

अत्र कुशलं, तत्रास्तु। अद्य सायङ्कालीनसमाचारपत्रे भवत: परीक्षापरिणाम: मया पठित:। एतद् ज्ञात्वा अहम् अतीव हर्षम् अनुभवामि यत् भवान् दशमकक्षायां प्रथमस्थानं प्राप्नोत्। मम सर्वे परिजना: मित्राणि च इदम् अवगत्य अतीव प्रसन्ना: अभवन्। मम साधुवादं स्वीकरोतु। सद्य: एव पत्रोत्तरं ददातु।

**भवत: मित्रम्**
**रजतशर्मा**

# निबन्ध-रचना

## संस्कृतभाषायाः महत्त्वम्

संस्कृतभाषा विश्वस्य सर्वासु भाषासु प्राचीनतमा सर्वोत्तमसाहित्यसंयुक्ता चास्ति। संस्कृता परिशुद्धा व्याकरणसम्बन्धिदोषादिरहिता संस्कृतभाषेति निगद्यते। प्राचीने समये एषैव भाषा सर्वसाधारणा आसीत्। सर्वे जनाः संस्कृतभाषाम् एव वदन्ति स्म। एषा एव अस्माकं पूर्वजानाम् आर्याणां सुलभा, शोभना, गरिमामयी च वाणी। संस्कृतभाषायामेव विश्वसाहित्यस्य सर्वप्राचीनग्रन्थाः चत्वारो वेदाः सन्ति येषां महत्त्वमद्यापि सर्वोपरि वर्तते। भास-कालिदास-अश्वघोष-भवभूति-दण्डि-सुबन्धु-बाण-जयदेव प्रभृतयो महाकवयो नाटककाराश्च संस्कृतभाषायाः एव। जीवनस्य सर्वसंस्कारेषु संस्कृतस्य प्रयोगः भवति।

अधुनाऽपि सङ्गणकस्य कृते संस्कृतभाषा अति उपयुक्ता अस्ति। संस्कृतभाषैव भारतस्य प्राणभूता भाषा अस्ति राष्ट्रस्य ऐक्यं च साधयति। भारतीयगौरवस्य रक्षणाय एतस्याः प्रसारः सर्वैरेव कर्त्तव्यः। अत एव उच्यते - 'संस्कृतिः संस्कृताश्रिता।'

## उत्सवः (दीपावलिः)

जीवनसङ्ग्रामे रतानां जनानां खेदनिवारणाय देशे-देशे उत्सवाः भवन्ति। उत्सवानाम् अभावे जनजीवनं नीरसं जायते। भारतवर्षे अपि बहवः उत्सवाः भवन्ति। तेषु उत्सवेषु मुख्याः दीपावलिः, रक्षाबन्धनम्, विजयादशमी, होलिका च सन्ति। दीपावलिः कार्तिकमासे कृष्णपक्षे अमावस्यायां भवति। मनुष्याः गृहाणि सुधया अङ्गणं च गोमयेन लिम्पन्ति। जनाः रात्रौ तैलैः वर्तिकाभिः च पूर्णान् दीपान् प्रज्ज्वालयन्ति। ते धनदेव्याः लक्ष्म्याः पूजनं कुर्वन्ति। दीपैः नगरं प्रकाशितं भवति। बालाः बहुप्रकारकैः स्फोटकैः मनोविनोदयन्ति। दीपावलीसमये वणिजोऽपि स्वान् आपणान् बहुविधं सज्जयन्ति। विद्युद्दीपकानां प्रकाशः आपणेषु नितरां शोभते। नानाविधानि वस्तूनि क्रयविक्रयार्थं प्रसारितानि भवन्ति। अयं कालः नात्युष्णो नाप्यतिशीतो भवति। तेन मोदन्तेऽस्मिन् महोत्सवे नराः नार्यश्च।

## सदाचारः

सताम् आचारः सदाचारः इत्युच्यते। सज्जनाः विद्वांसो च यथा आचरन्ति तथैव आचरणं सदाचारो भवति। सज्जनाः स्वकीयानि इन्द्रियाणि वशे कृत्वा सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। ते सत्यं वदन्ति, मातुः पितुः गुरुजनानां वृद्धानां ज्येष्ठानां च आदरं कुर्वन्ति, तेषाम् आज्ञां पालयन्ति, सत्कर्मणि प्रवृत्ताः भवन्ति।

जनस्य समाजस्य राष्ट्रस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारस्याभ्यासो बाल्यकालादेव भवति। सदाचारेण बुद्धिः वर्धते नरः धार्मिकः, शिष्टः, विनीतः, बुद्धिमान् च भवति। संसारे सदाचारस्यैव महत्त्वं दृश्यते। ये सदाचारिणः भवन्ति, ते एव सर्वत्र आदरं लभन्ते। यस्मिन् देशे जनाः सदाचारिणो भवन्ति तस्यैव सर्वतः उन्नतिर्भवति। अतएव महर्षिभिः आचारः परमो धर्मः इत्युच्यते। सदाचारी जनः परदारेषु मातृवत् परधनेषु लोष्ठवत्, सर्वभूतेषु च आत्मवत् पश्यति। सदाचारीजनस्य शीलम् एव परमं भूषणम् अस्ति।

## अनुशासनम्

जीवनस्य विविधक्रियाणां नियन्त्रणार्थम् अनुशासनस्य आवश्यकता भवति। एतदर्थं जीवने सर्वै: अनुशासनं पालनीयम्। अनुशासनरहितं जीवनं पशुवत् उच्छ्रृङ्खलं भवति। मानवसमाजस्य अस्तित्वं शोभा च अनुशासनेन एव भवति। ये जना: अनुशासनस्य एवमेव पालनं कुर्वन्ति ते जीवने श्रेय: लभन्ते। स्वानुशासनं मानवस्य एकं वैशिष्ट्यम् अस्ति। सेनायाम् अनुशासनस्य अत्यधिकं महत्त्वं भवति। विद्यार्थिनां जीवने अनुशासनस्य विशिष्टं स्थानं भवति। अनुशासनयुक्त: विद्यार्थी अत्युत्तम: भवति। अत: छात्रै: अनुशासनस्य पालनं कर्त्तव्यम्।

## महाकवि: (कालिदास:)

कविकुलशिरोमणि: महाकवि: कालिदास: संस्कृतभाषाया: श्रेष्ठतम: कवि: अस्ति। स: नाटककार: महाकाव्यप्रणेता गीतिकाव्यकर्ता (खण्डकाव्यकर्ता) च आसीत्। तस्य प्रमुखा: ग्रन्था: सन्ति यथा -

(अ) **त्रीणि नाटकानि -** मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम् च।

(ब) **महाकाव्यद्वयम् -** रघुवंशम् कुमारसम्भवं च।

(स) **गीतिकाव्यद्वयम् -** मेघदूतम् ऋतुसंहारम् च।

कालिदासस्य लोकप्रियताया: कारणं तस्य प्रसादगुणयुक्ता ललिता शैली अस्ति। कालिदासस्य प्रकृतिचित्रणं अतीव रम्यम् अस्ति। चरित्रचित्रणे कालिदास: अतीव पटु: अस्ति।

कालिदास: महाराजविक्रमादित्यस्य सभाकवि: आसीत्। अनुमीयते यत्तस्य जन्मभूमि: उज्जयिनी आसीत्। मेघदूते उज्जयिन्या: भव्यं वर्णनं विद्यते। कालिदासस्य कृतिषु कृत्रिमताया: अभाव: अस्ति। कालिदासस्य साहित्ये काव्यसौन्दर्यं रसनिरूपणं च सर्वत्र दृश्यते। तस्य सूक्तय: सुधासिक्ता: चेतोहरा: सन्ति। कालिदासस्य उपमाप्रयोग: अपूर्व: अत: साधूच्यते - 'उपमा कालिदासस्य।'

## मम दिनचर्या

प्रत्येकमानवस्य दिनचर्या पृथक् भवति। अहम् एक: छात्र: अस्मि। अहम् दशम-कक्षायां पठामि। अहं प्रतिदिनं प्रात: पञ्चवादने उत्तिष्ठामि। अहं चषकमेकं चायं पिबामि। अहं स्वमित्ररामचन्द्रेण सह भ्रमणाय गच्छामि। भ्रमणानन्तरम् अहं स्नानं करोमि। स्नात्वा विद्यालयं गच्छामि। विद्यालये प्रार्थना-घण्टिकावादनं भवति। सर्वै: छात्रै: सह प्रार्थनां कृत्वा स्वकक्षायां प्रविशामि। तदनन्तरं कक्षायाम् अध्ययनं करोमि।

अर्धावकाशे मित्रेण सह भोजनं करोमि। पूर्णे अवकाशे जाते स्वगृहम् आगच्छामि। विश्रामं कृत्वा पाठशालाया: गृहकार्यं करोमि। सायङ्काले अहं क्रीडामि। तदनन्तरम् अहम् अधीतपाठानां पुन: अभ्यासं करोमि। अहं भोजनं कृत्वा दूरदर्शनं पश्यामि। दशवादने शयनाय गच्छामि। एषा भवति मम दिनचर्या।

## छात्रजीवनम्

छात्रजीवनमेव मानवजीवनस्य प्रभातवेला आधारशिला च वर्तते। समस्तजीवनस्य विकासस्य ह्रासस्य वा कारणम् एतज्जीवनमेवास्ति। वस्तुत: विद्यार्थिजीवनं साधनामयं जीवनम्। अध्ययनं परमं तप उच्यते।

छात्रजीवने परिश्रमस्य महती आवश्यकता वर्तते। य: छात्र: आलस्यं त्यक्त्वा परिश्रमेण विद्याध्ययनं करोति स एव साफल्यं लभते। अतएव छात्रै: प्रात:काले ब्रह्ममुहूर्ते एव उत्थातव्यम्। कस्मैचित् कालाय भ्रमणमपि अनिवार्यम्। तत: प्रतिनिवृत्य स्नानसन्ध्योपासनादिकं विधाय अध्ययनं कर्त्तव्यम्। तदनन्तरं च लघुसात्विकं भोजनं दुग्धं च गृहीत्वा विद्यालयं गन्तव्यम्। तत्र गत्वा गुरून् नत्वा अध्ययनं कर्त्तव्यम्। छात्रै: असत्यवादनं न कदापि कर्त्तव्यम्।

छात्रजीवनं पूर्णत: अनुशासनबद्धं भवति। विद्यार्थिजीवने एव समस्तानां मानवोचितगुणानां विकासो भवति। छात्र एव राष्ट्रस्यानुपमा निधिरस्ति। अत: छात्राणां शारीरिकं चारित्रिकं च विकासं अत्यन्तानिवार्यम्। विद्यार्थिजीवनमेव सम्पूर्णागामिजीवनस्य आधारशिला। अत: तेषां सम्यक् रक्षणं, पोषणम् च कर्त्तव्यम्।

## अस्माकं देश:

भारतोऽस्माकं देश:। अस्माकं देशोऽति विशाल: अस्ति। अस्योत्तरस्यां दिशि हिमालयो वर्तते। सागर: अस्य पादप्रक्षालनं करोति। अस्य भूमि: शस्यश्यामला अस्ति। अस्माकं देशे अनेके प्रदेशा: सन्ति। अस्माकं देशे अनेका: भाषा: सन्ति। अस्मिन् देशे विभिन्नधर्मावलम्बिन: वर्तन्ते। अस्माकं देशे विविधा: संस्कृतय: सन्ति। परं सर्वासु संस्कृतिषु सादृश्यं वर्तते।

वयं मातु: औरसा: पुत्रा: इव निवसाम:। अस्माकं हृदये भावात्मिकी एकता विद्यते। सङ्कटकाले वयं क्षुद्रभेदान् परित्यज्य देशहितं चिन्तयाम:। भारतभूमि: अस्माकं माता अस्ति। वयं भारतभूमे: पुत्रा: स्म:। अस्या: सम्मानं रक्षितुं वयं सदैव तत्परा: स्म:। भारते प्रभूतम् अन्नं भवति। भारते अनेकानि ऐतिहासिकस्थलानि सन्ति। भारते गङ्गा-यमुना-गोदावरी-सरस्वती-नर्मदादय: नद्य: प्रवहन्ति।

विशालं भूमण्डलं व्याप्य अयं देश: एशियामहाद्वीपस्य अन्यतम: राष्ट्र: सञ्जात:। वयं सदा स्वराष्ट्रस्य रक्षां कर्तुम् उद्यता: स्याम।

कथितमस्ति - ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।''